CAMBRIDGE INTERNATIONAL EXAMINATIONS

**General Certificate of Education Advanced Level**

**SANSKRIT** **9606/1**

PAPER 1. Prescribed Texts

**MAY/ JUNE 2015**

Additional materials:
Answer paper

**TIME** $2^1/_2$ hours

**INSTRUCTIONS TO CANDIDATES**

Write your name, Centre number and candidate number in the spaces provided on the separate answer paper.

Answer all questions.

Write your answers on the answer paper provided.

If you use more than one sheet of paper, fasten the sheets together.

**INFORMATION FOR CANDIDATES**

The maximum number of marks for each question is shown in brackets [ ] at the end of each question.

**This question paper consists of 9 printed pages.**



© UCLES 2015

**1** *Buddhacarita of Aśvaghoṣa*

**(i)**

ततस्तथा गच्छति राजपुत्रे तैरेव देवैर्विहितो गतासुः ।
तं चैव मार्गे मृतमुह्यमानं सूतः कुमारश्च ददर्श नान्यः ॥

अथाब्रवीद्राजसुतः स सूतं नरैश्चतुर्भिर्ह्रियते क एषः ।
दीनैर्मनुष्यैरनुगम्यमानो भूषितश्चाप्यवरुद्यते च ॥

ततः स शुद्धात्मभिरेव देवैः शुद्धाधिवासैरभिभूतचेताः ।
अवाच्यमप्यर्थमिमं नियन्ता प्रव्याजहारार्थवदीश्वराय ॥

बुद्धीन्द्रियप्राणगुणैर्वियुक्तः सुप्तो विसंज्ञस्तृणकाष्ठभूतः ।
संवर्ध्य संरक्ष्य च यत्नवद्भिः प्रियप्रियैस्त्यज्यत एष कोऽपि ॥

इति प्रणेतुः स निशम्य वाक्यं संचुक्षुभे किंचिदुवाच चैनम् ।
किं केवलोऽस्यैव जनस्य धर्मः सर्वप्रजानामयमीदृशोऽन्तः ॥

ततः प्रणेता वदति स्म तस्मै सर्वप्रजानामिदमन्तकर्म ।
हीनस्य मध्यस्य महात्मनो वा सर्वस्य लोके नियतो विनाशः ॥

*Book 3, vv 54 to 59*

**(a)** Translate lines 1 to 4, *'tatas tathā . . . avarudyate ca'.* [4]

**(b)** Translate and name the types of the following compounds:
**(i)** *'śuddhātmabhiḥ'* (line 5)
**(ii)** *'abhibhūtacetāḥ'* (line 5)
**(iii)** *'sarvaprajānām'* (line 11) [3]

**(c)** What effect did this and other such outings have on the young prince? [2]

**(d)** Scan the final verse above (lines 11 and 12). [2]

**(ii)** अथ कष्टतपःस्पष्टव्यर्थक्लिष्टतनुर्मुनिः ।
भवभीरुरिमां चक्रे बुद्धिं बुद्धत्वकाङ्क्षया ॥
नायं धर्मो विरागाय न बोधाय न मुक्तये ।
जम्बुमूले मया प्राप्तो यस्तदा स विधिर्ध्रुवः ॥
न चासौ दुर्बलेनाप्तुं शक्यमित्यागतादरः ।
शरीरबलवृद्ध्यर्थमिदं भूयोऽन्वचिन्तयत् ॥
क्षुत्पिपासाश्रमक्लान्तः श्रमादस्वस्थमानसः ।
प्राप्नुयान्मनसावाप्यं फलं कथमनिर्वृतः ॥
निर्वृतिः प्राप्यते सम्यक् सततेन्द्रियतर्पणात् ।
संतर्पितेन्द्रियतया मनःस्वास्थ्यमवाप्यते ॥

*Book 12, vv 100 to 104*

**(a)** Translate lines 3 to 6, *'nāyaṃ dharmo .... bhūyo 'nvacintayat'.* [4]

**(b)** Translate and name the types of the following compounds:
**(i)** *'bhavabhīruḥ'* (line 2)
**(ii)** *'buddhatvakāṅkṣayā'* (line 2)
**(iii)** *'manaḥsvāsthyam'* (line 10) [3]

**(c)** In your own words, summarise the realization the Buddha came to as described in these verses and what course of action was followed by the Buddha thereafter. [2]

[Total: 11 + 9 = 20 marks]

**[Turn over**

**2** *Manu*

**(i)** इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ॥

एकादशेन्द्रियाण्याहुर्यानि पूर्वे मनीषिणः ।
तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः ॥

श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक्चैव दशमी स्मृता ॥

बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः ।
कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥

*Book 2, vv 88 to 91*

**(a)** Translate lines 1 to 4, *'indriyāṇāṃ ... yathāvadanupūrvaśaḥ'.* [4]

**(b)** Translate and name the type of the following compounds:
**(i)** *'hastapādam'* (line 6)
**(ii)** *'śrotrādīni'* (line 7)
**(iii)** *'karmendriyāṇi'* (line 8) [3]

**(c)** Give some examples of how the control of the senses was effected in the culture envisaged and recorded by the Manusmṛti. [2]

**(ii)** आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितम्।
आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्॥

खं संनिवेशयेत्स्वेषु चेष्टनस्पर्शनेऽनिलम्।
पक्तिदृष्ट्योः परं तेजः स्नेहेऽपो गां च मूर्तिषु॥

मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्॥

प्रशासितारं सर्वेषामणीयांसमणोरपि।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम्॥

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम्॥

*Book 12, vv 119 to 123*

**(a)** Translate and name the type of the following compounds:
- **(i)** *'ceṣṭanasparśane'* (line 3)
- **(ii)** *'paktidṛṣṭyoḥ'* (line 4)
- **(iii)** *'prajāpatim'* (line 6) [3]

**(b)** Translate lines 7 to 10, *'praśāsitāraṃ ... śāśvatam'.* [4]

**(c)** Bring these verses together with related verses in the *Bhagavad Gītā* and *Upaniṣads* to give an account of the higher Self they describe and the disciplines recommended to attain realization of that Self. [4]

[Total: 9 + 11 = 20 marks]

**[Turn over**

**3** *Upaniṣads*

**(i)**

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥

स पर्यगाच्छुक्रमकायमव्रण-
मस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भू-
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥

*Īśā Up. vv 5 to 8*

**(a)** Translate lines 1 to 4, '*tad ejati ... vijugupsate*'. [4]

**(b)** Translate and identify the following compounds:
**(i)** '*avraṇam*' (line 7)
**(ii)** '*asnāviram*' (line 8)
**(iii)** '*svayambhūḥ*' (line 9) [6]

**(c)** This ancient teaching about the inner Self has only been known about in the West for the historically short period of two hundred years. If people were to begin to heed the message it contains how do you think this would affect their lives and perhaps their social arrangements? [2]

**(ii)** अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति एवमेवैतद्याज्ञवल्क्य ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इति अग्निरेवास्य ज्योतिर्भवतीति अग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति एवमेवैतद्याज्ञवल्क्य ॥

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायते अथ यत्र वागुच्चरति उपैव तत्र न्येतीति एवमेवैतद्याज्ञवल्क्य ॥

*Bṛhadāraṇyaka Up. 4:3: 3 to 5 incl.*

**(a)** Translate lines 1 to 6, *'astam ita āditye . . . evam evaitad yājñavalkya'.* [4]

**(b)** These verses are part of a sequence of questions and answers leading to a climax. Summarise the sequence. [4]

[Total: 12 + 8 = 20 marks]

**[Turn over**

**4** *Bhagavad Gītā and Śaṅkara's Commentary*

(i) भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम्।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्॥

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथात्मानमकर्तारं स पश्यति॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारं ब्रह्म संपद्यते तदा॥

*Chap. 7, vv 4 to 6; Chap. 13, vv 28 to 30*

**(a)** In lines 1 and 2 above, an account of Kṛṣṇa's eightfold lower nature is given. Enumerate these eight elements. Then explain in your own words what Kṛṣṇa says of his higher nature in lines 3 and 4. [3]

**(b)** Translate and name the types of the following compounds:
**(i)** *'jīvabhūtām'* (line 4)
**(ii)** *'etadyonīni'* (line 5)
**(iii)** *'bhūtapṛthagbhāvam'* (line 11) [3]

**(c)** Translate lines 7 to 10, *'samaṃ paśyan . . . sa paśyati'.* [4]

**(ii)** श्रीभगवानुवाच।

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥

असंशयमिति। असंशयं नास्ति संशयो मनो दुर्निग्रहं चलमित्यत्र हे महाबाहो। किंत्वभ्यासेन तु अभ्यासो नाम चित्तभूमौ कस्यांचित्समानप्रत्ययावृत्तिश्चित्तस्य। वैराग्येण वैराग्यं नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासाद्वैतृष्ण्यं तेन च वैराग्येण गृह्यते विक्षेपरूपः प्रचारश्चित्तस्य एवं तन्मनो गृह्यते निगृह्यते निरुध्यत इत्यर्थः॥

*Śaṅkarabhāṣya* on *Bhagavad Gītā, Chap. 6, v 35*

**(a)** Translate the following words and their explanation as given by Śaṅkara*:*
- **(i)** *'asaṃśayam'* (line 4)
- **(ii)** *'abhyāsaḥ'* (line 5)
- **(iii)** *'vairāgyam'* (line 6) [6]

**(b)** Briefly discuss the methods used by Śaṅkara in his commentary on the *Bhagavadgītā*. [4]

[Total: 10 x 2 = 20 marks]

END